यहाँ से काटिए

Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 25

No. of Printed Pages – 03

VU–87–Sahit. Shas. (Supp.)

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

# वरिष्ठ उपाध्याय पूरक परीक्षा, 2017

## साहित्य – शास्त्रम्

**समय** : 3¼ **घण्टे**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभि : सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः।

2) सर्वे प्रश्नाः अनिवार्याः।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः।

यहाँ से काटिए

1) मेघ: कस्मिन् वंशे जात:? [1]

2) प्रियतम इव प्रार्थनाचाटुकार: क:? [1]

3) रन्तिदेवस्य कीर्तिरूपा का नदी अस्ति? [1]

4) दोषाङ्कुश: कतिविध:? नामानि लिखत। [1+1=2]

5) चन्द्रालोकानुसारं रसा: कति? नामानि लिखत। [1+1=2]

6) स्वाङ्कुरितव्यङ्ग्यं कतिविधम्? नामानि लिखत। [1+1=2]

7) प्रयोजन भेदेन लक्षणाकतिविधा? नामानि लिखत। [1+1=2]

8) ''रिक्त: सर्वो भवतिहिलघु: पूर्णता गौरवाय।'' इति सूक्ते: सप्रसङ्गो भावार्थो लेख्य:। [1+1=2]

9) समवृत्तस्य स्वरूपं विवेचयत। [2]

10) कयोश्चिद् द्वयो: लक्षणं सोदाहरणं लिखत। [1½+1½=3]

i) युक्ति: ii) सिध्दि: iii) प्रतिषेध:

11) उदारतागुणं लक्षणोदाहरणपूर्वकं विवेचयत। [1½+1½=3]

अथवा

''वयस्य पश्य पश्यास्याश्चञ्चलं लोचनाञ्चलम्।'' इत्यत्र को गुण:? लक्षणोल्लेखपूर्वकं सङ्गतिर्विधेया।

12) कयोश्चिद् द्वयोरलङ्कारयो: लक्षणोदाहरणानि सङ्गतिपूर्वकं प्रदर्शनीयानि। [1½+1½=3]

i) लाटानुप्रास: ii) समासोक्ति: iii) अनन्वय:

13) प्रस्तुतोदाहरणेषु द्वौ अलङ्कारौ परिचीय तयो: लक्षणोल्लेखपूर्वकं सङ्गातिरपि विधेया। [1½+1½=3]

i) अमन्दानन्दसन्दोहस्वच्छन्दास्पदमन्दिरम्।

ii) चन्दनं खलु गोविन्दचरण द्वन्द्ववन्दनम्।

iii) नायं सुधांशु: कि तर्हि व्योमगङ्गासरोरूहम्।

iv) स्यान्मल्लप्रतिमल्लत्वे सङ्ग्रामोद्दामहुङ्कृति:।

14) उपाधि-भेदेन लक्षणाया: भेदान् सोदाहरणं विवेचयत। [3]

15) विवक्षितवाच्यध्वने: मुख्यभेदान् विवेचयत। [3]

16) अभिधावृत्ति: का? सभेदं सोदाहरणञ्च लिखत। [3]

17) केषाञ्चन चतुर्णां दोषाणां लक्षणोदाहरणानि सङ्गतिपूर्वकं विवेचयत। [4 × 1 = 4]

i) अन्यसङ्गतम् ii) उपहत विसर्ग:

iii) न्यूनम् iv) कथितम्

v) सङ्कीर्ण: vi) भग्नप्रक्रम:

vii) अपुष्टार्थ:

**18)** निम्नलिखितालङ्कारयुग्मेषु द्वयो: परस्परं भेद: प्रदर्शनीय:। **[2 + 2 = 4]**

i) उपमेयोपमा – सम्पूर्णोपमा ii) उत्प्रेक्षा – अपह्नुति:

iii) प्रतिवस्तूपमा – रूपकम्

**19)** कयोश्चिद् द्वयोः रसयो: लक्षणोदाहरणे विवेचयत। **[2 + 2 = 4]**

i) हास्यरस: ii) श्रृंगाररस: iii) शान्तरस:

**20)** गुणीभूतव्यङ्ग्यस्य भेदान् विलिख्य अस्फुटगुणीभूतव्यङ्ग्यं सोदाहरणं लिखत। **[4]**

**21)** सप्रसङ्ग–व्याख्या कार्या। **[5]**

''निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।
सालङ्काररसानेकवृत्तिर्वाक्काव्यनामभाक्।।''

अथवा

शब्दस्य स्वरूपं विलिख्य तस्य भेदान् सोदाहरणं विवेचयत।

**22)** निम्नलिखितयोः द्वयोरेकस्य श्लोकस्य छन्दोऽलङ्कार –निर्देशपूर्वकं सप्रसङ्ग–व्याख्या कार्या। **[½+½+1+3=5]**

''धुमज्योति: सलिलमरूतां सन्निपात: क्व मेघ:,
सन्देशार्था: क्व पटुकरणै: प्राणिभि: प्रापणीया:।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।।

अथवा

''मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपम्,
सन्देशं में तदनु जलद श्रोष्यसि श्रोत्रपेयम्।
खिन्न: खिन्न: शिखरिषु पदं न्यस्यगन्तासियत्र,
क्षीण: क्षीण: परिलघु पय: स्रोतसां चोपभुज्य।।''

**23)** ''उपमाकालिदासस्य'' इति कथनं विवेचयत। **[5]**

**24)** सप्रसङ्गो भावार्थो लेख्य:। **[1 + 4 = 5]**

''तस्मिन्नद्रौ कतिचिदवला विप्रयुक्त: स कामी,
नीत्वा मासान्कनकवलय–भ्रंश–रिक्त प्रकोष्ठ:।
आषाढस्य प्रथम दिवसे मेघमाश्लिष्ट सानुं,
वप्रक्रीडापरिणतगज प्रेक्षणीयं ददर्श।।''

अथवा

तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां,
नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्र:।
दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं,
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्या:।।''

**25)** क) कयोश्चिद् द्वयो: छन्दसोर्लक्षणोदाहरणे विलिख्य सङ्गतिरपि प्रदर्शनीया। **[3 + 3 = 6]**

i) चन्द्रलेखा ii) शालिनी

iii) हरिणप्लुता

ख) प्रस्तुतोदाहरणे गणनिर्देशपूर्वकं छन्द: परिचीय तल्लक्षणमपि विवेचयत।

''नियतं कलानिधिरसीति बल्लवी।'' **[1 + 1 = 2]**

☛ ☛ ☛

DO NOT WRITE ANYTHING HERE